# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (११)

२६.११.२०१२

# पुनरावर्तनम्

- यञश्च - ङीप् । गार्गी ।

- प्राचां ष्फ तद्धितः - ष्फः + ङीष् - गार्ग्यायणी / गार्गी ।
- सर्वत्र लोहितादिकतन्तेभ्यः - ष्फः + ङीष् - लौहित्यायनी ।
- कौरव्यमाण्डूकाभ्यां च - ष्फः + ङीष् - कौरव्यायणी ।

- वयसि प्रथमे - ङीप् । कुमारी ।

# ४७९. द्विगोः (४.१.२१)

- एकपदात्मकं सूत्रम् ।
- ‘अजाद्यतष्टाप्’ (४.१.४) इत्यतः ‘अतः’ इति, ‘ऋन्नेभ्यो ङीप्’ (४.१.५) इत्यतः ‘ङीप्’ इति अनुवर्तते ।
- अदन्ताद् द्विगोः ङीप् स्यात् ।
- त्रिलोकी ।
- त्रिलोकीति ।
- अजादित्वात् त्रिफला । त्र्यनीका (सेना) ।

# ४८०. अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि (४.१.२२)

- पदत्रयम् । अपरिमाण-बिस्त-आचित-कम्बल्येभ्यः, न, तद्धितलुकि ।
- 'ऋन्नेभ्यो ङीप्' (४.१.५) इत्यतः 'ङीप्' इति, 'द्विगोः' (४.१.२१) इति च अनुवर्तते ।
- अपरिमाणान्ताद् बिस्ताद्यन्ताच्च द्विगोः ङीप् न स्यात् तद्धितलुकि सति ।
- पञ्चभिः अश्वैः क्रीता पञ्चाश्वा ।
- आर्हीयष्ठक् । तस्य 'अध्यर्ध..' (५.१.२८) इति लुक् ।
- द्वौ बिस्तौ पचति द्विबिस्ता ।
- द्वौ बिस्ताविति ।

- द्याचिता ।
- द्वौ आचितौ वहति इति द्याचिता शकटी ।
- द्याचितेति ।

- द्विकम्बल्या ।
- द्विकम्बल्येति ।

- परिमाणान्तात्तु द्याढकी ।
- परिमाणान्तात्त्विति ।

- तद्धितलुकि किम्?
- समाहारे पञ्चाश्वी ।

# ४८१. काण्डान्तात् क्षेत्रे (४.१.२३)

- पदद्वयम् ।
- ‘ऋन्नेभ्यो ङीप्’ (४.१.५) इत्यतः ‘ङीप्’ इति, ‘द्विगोः’ (४.१.२१) इति, ‘अपरिमाण..’ (४.१.२२) इत्यतः ‘न तद्धितलुकि’ इति च अनुवर्तते ।
- क्षेत्रे यः काण्डान्तो द्विगुः ततो न ङीप् तद्धितलुकि ।
- द्वे काण्डे प्रमाणम् अस्याः द्विकाण्डा क्षेत्रभक्तिः ।
- द्वे काण्डे इति ।
- ‘प्रमाणे द्वयसच्..’ इति विहितस्य मात्रचः ‘प्रमाणे लः, द्विगोर्नित्यम्’ इति लुक् ।
- क्षेत्रे किम् - द्विकाण्डी रज्जुः ।

# ४८२. पुरुषात्प्रमाणेऽन्यतरस्याम् (४.१.२४)

- पदत्रयम् । पुरुषात्, प्रमाणे, अन्यतरस्याम् ।
- ‘ऋन्नेभ्यो ङीप्’ (४.१.५) इत्यतः ‘ङीप्’ इति, ‘द्विगोः’ (४.१.२१) इति, ‘अपरिमाण..’ (४.१.२२) इत्यतः ‘तद्धितलुकि’ इति च अनुवर्तते ।
- प्रमाणे यः पुरुषः तदन्ताद् द्विगोः ङीब् वा स्यात् तद्धितलुकि ।
- द्वौ पुरुषौ प्रमाणम् अस्याः सा द्विपुरुषी द्विपुरुषा वा परिखा ।
- द्वौ पुरुषाविति ।